National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(22): 114-117
© 2019 NJHSR
www.sanskritarticle.com

**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# मयूरदूते मेघसन्देशस्य प्रभावः

**आचार्यः जि. पद्मनाभम्**

**सारांशः –** अस्मिन् शोधलेखे संस्कृतसाहित्यस्य सुप्रसिद्धस्य 'मेघदूतस्य' (मेघसन्देशस्य) प्रभावः आधुनिककाव्ये **'मयूरदूते'** कथं वर्तते इति सविस्तरं विवेचितम् । लेखकेन खण्डकाव्यस्य लक्षणानि, सन्देशकाव्यस्य परम्परा च स्पष्टीकृत्य उभयोः काव्ययोः इतिवृत्तं, नायक-नायिकाविमर्षः, प्रकृतिचित्रणं, रसयोजना तथा च छन्दोविधानं च प्रदर्शितानि । लेखस्य मुख्यः निष्कर्षः अयमस्ति यत् **डा. पि. के. नारायणपिल्लै** महोदयेन विरचितः 'मयूरदूतः' न केवलं मन्दाक्रान्तावृत्तं स्वीकरोति, अपितु भाव-कल्पना-वर्णनशैलीषु अपि कालिदासस्य पदचिह्नानि अनुसरति ।

**कूटशब्दाः (10 Keywords)**

१. खण्डकाव्यम् २. सन्देशकाव्यम् ३. विप्रलम्भशृङ्गारः ४. मन्दाक्रान्ता ५. केरलवर्मा ६. लक्ष्मीभाई ७. मयूरदूतः ८. मेघसन्देशः ९. प्रस्थानमार्गः १०. प्रकृतिवर्णनम् ।

## साहित्ये खण्डकाव्यम्

सहितयोः शब्दार्थयोः भावः साहित्यम् इत्युच्यते । साहित्यस्यैव वाङ्मयम् इति अपरं नाम । वाङ्मयं तावत् वैदिकं, लौकिकं चेति द्विविधम् । वैदिकं तु वेदवेदाङ्गानि, लौकिकं तु रामायणमहाभारतादिसर्व-काव्यप्रपञ्चं भवति । काव्यं तावत् दृश्यकाव्यं श्रव्यकाव्यं चेति द्विविधम् । श्रव्यकाव्यमपि पद्य-गद्य-चम्पू-नाम्ना त्रिविधं भवति । पद्यकाव्यमपि विश्वनाथालङ्कारिकैः त्रिधा विभक्तम् । महाकाव्यं, खण्डकाव्यं, कोशश्चेति । सर्गबन्धो महाकाव्यमित्युच्यते इति वचनानुसारं महाकाव्ये नैके सर्गाः स्युः । “नगरार्णवशैलर्तु....” इत्यादि वचनानुसारं महाकाव्ये अनेकानि वर्णनानि स्युः । एको रसो अङ्गीकर्तव्यः “वीरः श्रृङ्गार एव वा” इति वचनानुसारम् । एवं विविधाङ्गसहितमेव महाकाव्यम् । खण्डकाव्यं तु महाकाव्यस्य एकदेशानुसारि एव । कोशस्तु परस्परानपेक्षश्लोकसमूहः एव इति विश्वनाथस्याभिप्रायः । मुक्तककाव्यान्यपि कोशविभागस्य सम्भन्धीन्येव । खण्डकाव्यमुक्तककाव्ययोः द्वयोः अपि लघुकाव्यानीति नाम । **“खण्डकाव्यं भवेत्काव्यस्यैकदेशनुसारि च”** इति साहित्यपदर्पणे उच्यते। लघुकाव्यानि कैश्चित् क्षुद्रकाव्यानीत्युच्यन्ते । अत्र क्षुद्रपदस्थ 'अल्प' 'लघु इत्यर्थावेव स्वीकृतौ । आधुनिकसाहित्यकारैः एतानि लघुकाव्यानि गीतिकाव्यानि इत्युच्यन्ते । आंग्लसाहित्ये Lyrical Poetry इति कथ्यन्ते । एतन्न केवलं पठनार्थं किन्तु गातुमपि योग्यं भवति । 'Lyre' इति एकं वाद्यविशेषं वादयन् तत् कविता गानकरणेन अस्य Lyric इति जातम् ।'

## सन्देशकाव्यलक्षणानि

महाकाव्यलक्षणान्युद्दिश्य आलङ्कारिकैः बहुधोक्तम् । किन्तु सन्देशकाव्यलक्षणान्युद्दिश्य इदमित्थंतया नोक्तम् । किन्तु सन्देशकाव्यपरिशीलनात् कानिचन लक्षणानि ज्ञातुं शक्यन्ते । गेयकाव्यान्युद्दिश्य T.K. रामचन्द्र ऐय्यर् महाभागः स्वसंस्कृतसाहित्यचरित्रे एवं लिलेख -

A Lyric is the expression of a feeling, thought or Sentiment in a vivi manner. It is an out pouring of the human heart filled with emotion.

संस्कृतसाहित्ये गेयकाव्यान्येव सन्देशकाव्यानीत्युच्यन्ते। गेय काव्यानि द्विधा विभक्तानि । यथा - 1. श्रृङ्गार गीतानि Erotic Lyrics 2. भक्ति गीतानि (Devotional) च । एतानि सन्देश काव्यानि श्रृङ्गार गीत विभागस्य सम्बन्धीनि ।'

विशेषतः कवयः महाकाव्यनिर्माणे पुराणेतिहासेभ्यः इतिवृत्तं स्वीकुर्युः । तत्रापि उन्नत वंशजानां, समाजे उन्नतस्थानं प्राप्तानां चरित्रचित्रणमेव कुर्युः। महाकाव्येषु सामान्यप्रजाजीवितचित्रणस्य स्थानं नास्ति। सामान्यजनजीवनचित्रणार्थमेव कवयः लघुकाव्यानि रचयामासुः । एषु लघुकाव्येषु प्रजानां जीवनविधानं सुष्ठु वर्ण्यते । आकारे खण्डकाव्यं अत्यल्पमेव । एषु लघुकाव्येषु कविः स्वभावानुभूतीनां मेव प्राधान्यं वि धत्ते। अत्र कथायाः स्थानं अत्यल्पं । कवेः हृदयानुभूतयः नित्यजीवितस्य अत्यन्त निकटे एव स्युः सम्पूर्णकथा लघु संघट नान्युद्धिश्यैव आधारिता स्यात्। अपि च प्रकृति वर्णनैः पूरितं स्यात्। अत्र सर्गविभाजनायां स्थानं नास्ति । पात्रसंख्यापि अत्यल्पा। एको वा द्वौ वा स्युः। तस्मात् सहज समाज मानव वस्तु चित्रण मेव लघुकाव्यानां प्रधानं लक्षणम्। एतेषु लघुकाव्येषुभ्भाषायाः शैली सरला ललिता मधुराच, श्रृङ्गार वर्णनान्येव अधिकतया विद्यन्ते ।

एवमेतादृशेषु सन्देशकाव्येषु मयूरदूतमन्यत् । मेघदूतस्य शैलीमाधारीकृत्य एतत् काव्यं रचितम् । अधुना उभयोः मध्येन तुलना क्रियते ।

**मयूरदूते मेघदूतस्य प्रभावः**

सन्देशकाव्येषु कालिदासमहाकविना विरचितः मेघदूतः प्रप्रथमो ग्रन्थोऽस्ति । अस्य मेघसन्देशस्य काव्यस्य प्रभावः अनन्तरकाले आगतेषु काव्येषु अस्ति वा न वा इत्ययं विषयः अत्र चर्च्यते। क्रैस्तवीय- विंशतिशताब्द्याः डा.पि.के.नारायणपिल्लैमहोदयेन विरचितस्य मयूरदूतस्य उपरि मेघसन्देशस्य प्रभावः अस्ति वा न वा ? यद्यस्ति केन रूपेण विद्यते इति ज्ञानं समुचितं अवश्यं च प्राप्तव्यम्। एतदर्थम् इतिवृत्तस्य, नायिकानायिकयोः, रसादिविषयाणां च चर्चा क्रियते चेत् मयूरदूतस्योपरि मेघसन्देशस्य प्रभावः सम्यक् ज्ञायते ।

**इतिवृत्तम्**

इतिवृत्तं तु काव्यस्य शरीरं परिकीर्त्यते इति आलंकारिकाः वदन्ति । सन्देश काव्येषु प्रधानतया नायकाभ्यां परस्परं स्वसन्देश प्रेषणमेव इतिवृत्तं भवति । मेघसन्देशे पूर्वं कश्चन यक्षः कुबेरेण एकस्मिन् अधिकारे नियुक्तः अभूत् । तत् कार्ये प्रमत्तः सः यक्षः तम् अधिकारं सम्यक् न पालयामास । कुपितः कुबेरः एकवर्षावधि कान्तावियोगेन वने स्थीयताम् इति यक्षं शशाप । तच्छापवशात् यक्षः भार्यावियोगेन रामगिर्याश्रमेषु निवसन् वर्षाकालारम्भे भार्या वियोगं असहमानः सन् युक्तायुक्तविवेचनाज्ञानहीनं मेघम् अलकापत्तने विद्यमानायाः भार्यायाः सकाशे दूतरूपेण सम्प्रेषणम् एव मेघसन्देशस्य इतिवृत्तं भवति । निर्जीवो मेघः यक्षस्य मन्देशं कथं वदिष्यति ? इति प्रश्नस्य समाधानतया **"कामार्ता हि प्रकृतिकृपणाः चेतनाऽचेतनेषु"** इति कालिदासः चमत्कृतवान् ।[1] काव्यमिदं पूर्वमेघः उत्तरमेघः इति द्विधा विभक्तम् । पूवमेमेघे अलकापत्तनस्य प्रस्थानमार्गौ वर्णितः । उत्तरमेघे तु यक्षस्य सौधं (गृहं) भार्यायाः अवस्थाः सन्देशश्चेते विषयाः वर्णिताः । अस्मिन् काव्ये प्रधानो रसः विप्रलम्भश्रृङ्गारः ।

मयूरदूतनाम्नि काव्ये तु केरलवर्माख्यः **स्यानन्दूरनगरे** निवसति स्म । सः राजकीयकारणात् "अयिलम्-तिरुताल्" इति महाराजेन बन्धितस्सन् श्रीहरिक्षेत्रं पुरीं प्रति प्रेषितः । श्री हरिक्षेत्रपुर्यां निवसन् केरलवर्मा एकदा स्कन्ददेवं सेवितुं स्कन्दालयं प्रति गतः । तत्र भगवद्वाहनं मोहनाङ्गं नीलकण्ठं (मयूरं) दृष्टवान् ।[2]

मेघालोकात् मुदितस्य हृदयं बर्हभारप्रसारैः नृत्यन्तं ललितचलनं च केकिवर्यं दृष्ट्वा वियुक्तां नीलवेणीं निजसहचरीं (भार्यां) स्मारं स्मारं शोकावेगात् त्रुटितहृदयः मौनी सन् तत्र देवालये तस्थिवान्'[3]। ततः भक्त्या स्कन्दम् आवन्द्य दैवसाहाय्यमस्ति चेदात्मनः हानिर्न भवतीति आत्मानम् आश्वासयन् प्रणयविवशो भूत्वा चिन्तामग्नः सपदि आर्तः सः वर्मा एवं मयूरं सञ्जगाद[4] -

हे खगवर ! मयूर ! भार्यावियोगाभितप्ते मयि कृपां कुरु । मन्दभाग्याय मे योग्यं साहाय्यं च कुरु। सुरपुरनिभं स्यानन्दूरं (तिरुवन्तपुरं) प्राप्य विरहविधुरां मत्प्राणनाथां मे सन्देशान् आनन्दजलधिं प्लावय। इति उक्त्वा सः मयूरद्वारा स्वभार्यायै लक्ष्मीदेव्यै सन्देशप्रेषणमेव अस्मिन् काव्ये इतिवृत्तम् ।

अस्मिन् काव्ये मेघसन्देश इव पूर्वभागः उत्तरभागश्चेति द्वौ भागौ स्तः। पूर्वभागे स्यानन्दूरपत्तनस्य गमनमार्गमुद्दिश्य वर्णना क्रियते । उत्तरभागे तु स्यानन्दूरपत्तनसौभाग्यं, स्वभार्यायाः देवहरप्रासाद-वर्णनं स्वभार्यायाः देहसौन्दर्यवर्णनं तथा च स्वसन्देशः इत्येते विषयाः वर्णिताः । अत्रत्यो रसस्तु विप्रलम्भशृङ्गारः। एवम् इतिवृत्तविषये अस्य काव्यस्य उपरि मेघसन्देशप्रभावो विद्यते इति निश्चितः ।

**नायिकानायकौ**

मयूरदूते नायिकानायकौ क्षत्रियजातिसम्बन्धिनौ आस्ताम् । नायकः केरलवर्मा, नायिका लक्ष्मीभाई, एतौ द्वावपि केरलदेशे साहित्यसांस्कृतिकरङ्गेषु

**नायिका -** अस्य पद्यकाव्यस्य नायिका राणीलक्ष्मीभाई Travancore महाराजयोः अयिल् तिरुनालू, विशाक तिरुनाल् इति महाभागयोः भागिनेयी आसीत्। तस्मिन् समये Travancore महाराजभवनस्य महाराज्ञी बभूव । असाधारणसौन्दर्यवत्याः राज्ञीलक्ष्मीभाईमहाभागायाः जन्मतः एव असाधारणप्रज्ञापाटवाः अपि प्राप्ताः । क्रैस्तवीये 1858 तमे वर्षे लक्ष्मीपुरराजभवनस्य सदस्येषु अन्यतमं केरलवर्माणं सा उवोढ। तदा सा एकादशवर्षीया आसीत् । तया बाल्ये एव मातुः सकाशात् संस्कृतं सम्यक् अधीतम् । एवं क्रमेण सा साहित्यसङ्गीतचित्रकलादिषु असाधारणप्रज्ञां प्राप्तवती । राणीलक्ष्मीभाई स्वपतये केरलवर्मणे संस्कृतं, संगीतं च बोधयामास । संस्कृतभाषायां कवयित्री सा नलचरितम्, गोपिकावस्त्रापहरणम्, महिषासुरमर्दिनीस्तोत्रम्, पार्वतीस्तोत्रम्, विरहिणीप्रलापम् इत्यादीनि पद्यकाव्यानि

रचयामास ।[5]

तस्याः राज्याः तुल्यसौन्दर्यवती जगति स्वर्गेऽपि अन्या न विद्यते । यद्वपुः प्रेक्षकाणाम् अक्ष्णोः सपदि हर्षपीयूषवर्षं क्रियते । तस्याः तेजःक्रान्तिप्रसारमहितं रूपम् अन्यासु नारीरत्नेषु न दृश्यते । स्वपार्श्वगतानां जनानां निखिलसन्तापं निवार्य कल्पवृक्ष इव अर्थिजनमनोरथसिद्धिं प्रापयति । एवं नैके विषयाः मयूरदूते द्वितीयभागे तस्याः गुणगणानुद्दिश्य ज्ञातुं शक्यन्ते[6]।

वीणावादनेऽपि तस्याः प्रावीण्यं विद्यते इति अनेन श्लोकेन ज्ञायते । यथा -

**वाणीदेवी सुरनिलयनाद्भूतये सज्जनानां**
**क्षोणीलोके सकृपमवतीर्णेति शङ्कां ददाना।**
**नाणी यस्या करपटुतया वादयेत्साधु वीणा-**
**मेणीनेत्रा कण्वणितसुधया ह्लादयन्ती हृदं ते ।।**[7]

**नायकः -** अस्मिन् काव्ये नायकः केरलवर्मा । मलयालभाषायां विरचितस्य मयूरसन्देशकाव्यस्य कर्ता अपि । सः चङ्गन् चरी Changan Chery लक्ष्मीपुरप्रसादस्य सदस्योऽप्यासीत् । लक्ष्मीपुर- प्रासादस्य Travancore राज्यराजवंशैः वैवाहिकसम्बन्धाः आसान्। लक्ष्मीपुरप्रासादस्य एकस्य शाखागृहस्य सम्बन्धी केरलवर्मा तदनन्तरकाले हरिक्षेत्रं (Harippad) गतवान् । तत्र अनन्तपुरस्य प्रासादे निवसति स्म । उपर्युक्तकारणात्केरलवर्मा लक्ष्मीभाई महाभागां उवोढ । लक्ष्मीभाईमहाभागा स्यान्दूरपुरस्य महाराज्ञा आसीत् । महाराज्ञ्याः विवाहसम्बन्धेन केरलवर्मणः विशेषगौरवाधिकाराः सम्प्राप्ताः एवं Travancore राज्यस्य राज्ञा साकम् अस्य विरोधः समजनि । तस्मात् कारणात् एव तं बध्वा Alleppey कारागारं प्रति प्रेषयामास । ततः कतिपयदिनानन्तरं केरलवर्मणः मातुः प्रार्थनाम् अङ्गीकृत्य राजा तं श्रीहरिक्षेत्रपुर्यां गृहनिर्बन्धे स्थापितवान् । स्कन्ददेवालयं द्रष्टुमपि अनुमतिं ददौ । एवं स्थिते एकदा स्कन्ददेवालयं द्रष्टुम् आगतः केरलवर्मा तत्र स्कन्दस्य वाहनं मयूरं दृष्ट्वा तं स्वभार्यायै दूतत्वेन प्रेषयितुं निश्चिकाय मयूरमपि तदेव कर्तुं प्रार्थयामास । तद् द्वारा भार्यायै सन्देशं प्रेषयति स्म।

**प्रकृतिवर्णना**

साधारणतया सन्देशकाव्येषु प्रकृतिवर्णनान्येव अधिकतया विद्यन्ते । तेषां वर्णनानां सोदाहरण- रूपेण वर्णनं समुचितमिति मन्ये ।

मेघसन्देशे - हे मेघ ! तत्र वर्षणोत्तरं सुगन्त्यारण्यकहस्तिमदमिश्रं जम्बूकुञ्जप्रतिबद्धवेगं नर्मदाजलं गृहीत्वा गच्छ । इत्थम् अन्तःसारं त्वां वायुः तुलयितुं समर्थो न भविष्यति। यतः सर्वोऽपि रिक्तो लघुर्भवति पूर्णश्च गुरुः सम्पद्यते[8]।

अमुमेवाभिप्रायं स्वीकृत्य मयूरदूतेऽपि कविः एवं वक्ति - द्रष्टव्यं सकलमपि वीक्ष्य श्रीलं वेलीं प्राप्य तां वेलीं सम्यक् पश्य । तत्र प्रतनुविभवः जलमादातुकामः मेघव्रातः इव महाप्रस्तरौघः अस्ति इति कथयति [9]।

मेघसन्देशे रेवा नद्यां तोयमादाय गच्छेः इति कालिदासः मेघमुद्दिश्य वक्ति। मयूरदूते तु श्रीलं वेल्यां नीरमादातुकामः आगतः मेघव्रातः इव महाप्रस्तरौघोऽस्ति इति कथयति कविः ।

किञ्च मेघसन्देशः अलकापूर्यां बालकल्पवृक्षो वर्णितः । अत्रायं विषयः - हे मेघ! तत्र अलकाया कुबेरप्रासादात् उत्तरदिशि बहुवर्णतोरणरमणीयम् अस्मदीयं भवनं दूरादपि दर्शनीयम् आस्ते । यस्य पार्श्वदेशे मदीयदयितया सुतवत्पोषितो बालकल्पवृक्षो लक्ष्यते।[10]

अमुमेवाभिप्रायं स्वीकृत्य मयूरदूतकारः स्थानन्दूरपुरे बालमाकन्दवृक्षं वर्णितवान् । विषयस्तु एवम्- मत्प्रियया लक्ष्मीभाई-महाभागया पोषिते उद्यानवने सारामोदप्रसवनिकराः धारालोद्यसुमधुरकलाः सौधोपान्ते विलसत् बालमाकन्दवृक्षाः सर्वेषामपि चेतः उपचितरसं तन्वन्ति।[11]

उभावपि कवी आम्रवृक्षमेव वर्णयतः। एवमन्यत्रापि नैकाः वर्णनाः समरूपतया मेघदूत-मयुरदूतयोः प्राप्यते ।

**रसः -** मेघसन्देश इव मयूरदूतेऽपि विप्रलम्भश्रृङ्गार एव अङ्गिरसोऽस्ति। तत्र तत्र इतररसानां पोषत्वे स्थितेऽपि विप्रलम्भ एव प्रधानतया वर्ण्यते ।

**वृत्तम् -** अस्मिन् काव्ये वृत्तं छन्दः मेघसन्देश इव मन्दाक्रान्तैव । तद्वृत्तस्य लक्षणं तु -

**'मन्दाक्रान्ता जलधिषडगैम्भौ नती तागुरुश्चेत्'।**

अर्थात् मन्दाक्रान्तावृत्ते 'म' गणः 'भ' गणः 'न' गणः 'त'गणद्वयं गुरुद्वयञ्च विद्यन्ते । यतिस्थानं तु चतुर्णाम् अक्षराणाम् अनन्तरं ततः षण्णाम् अक्षराणाम् अनन्तरं भवति ।

उदाहरणं यथा –

म भ न त त गुगु
ऽऽ ऽऽ ।।।।।।ऽऽऽ।ऽऽ।ऽऽ

श्रीमान् के कीन् यदि तु भवता प्राप्यते सा पुरी चेत्[12]

अस्मिन् उदाहरणे मगणः, भगणः, नगणः, तगणद्वयं, गुरुद्वयं क्रमशः विद्यन्ते।

अपि च "श्रीमन्केकिन्" इत्यनन्तरं "यदि तु भवता" इत्येवम् अर्थात् - चतुर्णाम् अक्षराणां ततः षण्णाम् अक्षराणाम् अनन्तरं यतिः भवति । अतः इदम् उपर्युक्तलक्षणानुसारेण मन्दाक्रान्तावृत्तं भवति ।

**उपसंहारः (Conclusion)**

निष्कर्षरूपेण वक्तुं शक्यते यत् कालिदासस्य मेघदूतं संस्कृतसाहित्ये एका नवीना युगप्रवर्तिका 'सन्देशकाव्य'परम्परा आरब्धा । तस्याः परम्परायाः अनुसरणं कुर्वन् **मयूरदूतः** अर्वाचीनकालेऽपि तमेव प्राञ्जलं मार्गं दर्शयति । यद्यपि मयूरदूतस्य घटनाः (केरलवर्मणः कारावासः इत्यादयः) ऐतिहासिक्यः सन्ति, तथापि तस्य काव्यमयी प्रस्तुतिः पूर्णतया मेघदूतस्य प्रभावेण रञ्जिता अस्ति । उभयोः काव्ययोः मन्दाक्रान्तावृत्तस्य लालित्यं, विरहिणः नायकस्य

व्याकुलता, प्रकृतौ चेतनाचेतनभेदशून्यता च समाना दृश्यते, येन सिद्धं भवति यत् कालिदासः अद्यापि परवर्तिकविनां कृते उपजीव्यः वर्तते ।

**सहायकग्रन्थसूची**


१) **मेघदूतम्(सञ्जीवनीसहितम्),** महाकविः कालिदासः, मल्लिनाथः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१८ ।

२) **मयूरदूतम् (Preface & Hist. Background),** डा. पि. के. नारायणपिल्लै,केरलोपहारमुद्रणालयः, तिरुवनन्तपुरम्, १९४४।

३) **साहित्यदर्पणः,** विश्वनाथकविराजः, शालिग्रामशास्त्री, मोतीलाल बनारसीदास, दिल्ली, २०१५ ।

४) **संस्कृतसाहित्यचरित्रम्,** टी. के. रामचन्द्र अय्यर, आर. एस. वडयार एण्ड सन्स, पालक्काड, २०१२ ।

५) **History of Sanskrit Literature,** ए. बी. कीथ, मोतीलाल बनारसीदास, दिल्ली, १९९३ ।

६) **अभिराजयशोभूषणम्,** अभिराजराजेन्द्रमिश्रः, वैजयन्तप्रकाशनम्, इलाहाबाद, १९८८ ।

७) **काव्यप्रकाशः,** मम्मटाचार्यः, आचार्यविश्वेश्वरः, ज्ञानमण्डल लिमिटेड, वाराणसी, २०१० ।

८) **संस्कृतसन्देशकाव्यपरम्परा,** डा. जे.एस्.कुलश्रेष्ठ, इन्डोलोजिकल बुक हाउस, दिल्ली, १९९५ ।


**सन्दर्भ ग्रन्थः**

1 धूमज्योतिः सल्लिमरुतां सन्निपातः क्व मेघः ?
सन्देशार्थाः क्वपटुकरणैः प्राणिभिः प्रापणीयाः ?।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तंययाचे
कामाऽऽर्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु ।। (मे.सं. – 1/5)

2 आविश्चिन्तस्स खलु निवसन् श्री हरिक्षेत्रपुर्यां
देवं स्कन्दं कलितकुतुकं सेवितुं जातु यातः ।
भाविक्षेयः पिशुनशकुनं दृष्टवान् नीलकण्ठं
देवागारे कचन भागवद्वाहनं मोहनाङ्गम् ।। (मयूरदूतम् – 1/3)

3 मेघालोकान्मुदितहृदयं बर्हभारप्रसारै –
नृत्यन्तं तं ललितचलनं केकिवर्यं स दृष्ट्वा ।
स्मारं स्मारं निजसहचरीं नीलवेणीं वियुक्तां
शोकावेगात्त्रुटितहृदयस्तस्थिवांस्तत्र मौनी ।। मयू. दू. 1-4

4 सन्तापघ्नं सकलजगतां स्कन्दमावन्द्य भक्त्या
प्रीते तस्मिन् किमपि न भवेद्वाममित्याश्वसन् सः ।
स्थित्वा तत्र प्रणयविवशस्तं मयूरं नितान्तं
चिन्तामग्नः सपदि मनसा सञ्जगादैवमार्तः ।॥ मयू. दू. 1-5

5 Rani Lakshmi bai, the heroine of the poem, was the niece of the above two royal personages and the senior Rani of the Travancore royal house at that time. An estremly beautiful princess born with extraordinary gifts, she was married to Kerala Varma, a member of the Lakshmipuram palace in 1858 when she was eleven years old. Teh prines who received instruction in Sanskrit in her child hood from her learned mother gradually grew up as a tallented musician, poeters and water colour panter. Her cansort gave her instruction in Sanskrit classies and in turn she taught him music. Nalacarita, Gopika Vastra paharana, mahishasuramardini, Stotra, Parvati - Stotra, and Virahini Pralapa are some of her poetic compositions (Mayuradutan - Preface Historical Back Ground page – 19)

6 तुल्या राज्ञा जगति न परा विद्यते हृद्यरूपा
स्वर्गेऽप्येवं सुमतिभिरलं कीर्तनीयैर्गुणौधैः।
सौभाग्यं श्रीलसितसदनं यद्वपुः प्रेक्षकाणां
कुर्यादक्ष्णोः स पदि कृतीनां हर्षपीयूषवर्षम् ।। मयू. दू. 2-35
हन्तानन्तातलपरिवृढा भूतिमत्त्वेऽप्यपास्ता-
हन्ता दन्तावलगतिरतिस्निग्धचेताविनीता ।
सन्तापं सा निखिलमपसार्याशु पादश्रितानां
सन्तानाख्यस्तरुरिव ददात्यर्थितार्थानशेषान् ।। मयू. दू. 2-37

7 मयूरदूतम् – 2/41

8 तस्यास्ति कैर्वनगजमदैर्वासितं वान्तवृष्टि –
जन्बूकु ञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तः सारं घन। तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ मेघ. सं. 1-20

9 यत्र क्रीडारसभरितधीर्यौवनस्योदये स-
न्मित्रैः साकं बहुतियमहं नीतवान् कॉलमङ्ग ।
मेघव्रातः प्रततुविभवोनीरमादातुकामः
साकाल्येनागत इव महाप्रस्तरौघोऽस्ति तत्र ।। मयू. दू. 1-64

10 तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो–
रन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यो ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठश्लेषप्रणयिनि जने किं पुन दूरसंस्थे । मेघ. सं. 1-3

11 बालानामप्युदितकुतुकादुद्यताभ्यां कराभ्यां
प्राप्यैः स्वाद्यैर्निरुपमरूचा लम्बमानैः फलौगैः ।
सौधोपान्ते विहग। विलसद्बालमाकन्द वृक्षाः
सर्वेषामप्युपचितरस तत्र नन्वन्ति चेतः ।॥ मयू, दू. 2-25

12 श्रीमान् केकिन् ! यदि तु भवता प्राप्यते सा पुरीचेत्
कान्त्याभोगादवनिकमलां मत्प्रियां वीक्ष्य साध्वीम् ।
भूयान्नूनं नयनसुकृतं किञ्च तत्प्राणरक्षा –
कृत्येन स्यान्महितमथ ते पुण्यजातं सुजातम् ।। मयू. दू. 1-10